International Journal of Sanskrit Research 2022; 8(1): 13-15

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 13-15
© 2022 IJSR
www.anantaajournal.com
Received: 08-11-2021
Accepted: 10-12-2021

**डॉ0 संगीता अग्रवाल**
एसोसिएट प्रोफेसर, आर्य कन्या पीजी कॉलेज, हापुड, उत्तर प्रदेश, भारत

**दीपक कुमार**
शोधार्थी, आर्य कन्या पीजी कॉलेज, हापुड, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ0 संगीता अग्रवाल**
एसोसिएट प्रोफेसर, आर्य कन्या पीजी कॉलेज, हापुड, उत्तर प्रदेश, भारत

# आधुनिककाले संस्कृतस्य उपयोगिता

**डॉ0 संगीता अग्रवाल एवं दीपक कुमार**

**सारांश**
इत्थ वयं वक्तु शक्नुमः यत् आधुनिककाले अपि संस्कृतस्य महति उपयोगिता परिलक्ष्यते। अधुना सर्वत्र हिंसा, भ्रष्टाचारः, अनुशासनहीनता, राष्ट्रियैकतायाः अभावः, आर्थिक विषमता इत्यादयः दृश्यन्ते। एतेषां मुख्य कारणं संस्कृतस्य उपेक्षणमेव वर्तते। आचारशिक्षासंग्रहणाय, नीतितत्त्वावबोधाय, अध्यात्मशास्त्रानुशीलनाय, संगीतनृत्याभिनयादिकलानां सूक्ष्मज्ञानाय संस्कृतविद्या एव आधारशिला विद्यते। सम्प्रति खण्डितराष्ट्रियैकता, भाषावाद–प्रान्तवाद जातिवाद–भ्रष्टाचार इत्यादीनां समस्यानां समाधानं संस्कृतेन एवं भवितुम् शक्नोति।

**कूटशब्द :** प्रचुरसाहित्यसम्पन्ना, सर्वविदितमेव पुरुषार्थसिद्धि, संस्कृतिरिति, सर्वोपरि, मुलाधारस्तु, शोभाधायकाः राष्ट्रियैकतायाः इत्यादयः।

**प्रस्तावनाः**
अस्माकं संस्कृतभाषा न केवलं भारतस्य अपितु विश्वस्य प्राचीनतमा भाषा विद्यते। याः भाषाः अद्य संसारे प्रचलिताः सन्ति याश्चापि अतीतकाले विलुप्ताः अभवन् तासां निखिलानामपि भाषणां स्रोतं इयमेव भाषास्ति। परिष्कृता, परिशुद्धा, अदोषा, संस्कार–सम्पन्ना भाषा संस्कृतभाषा अभिधीयते। एषा हि विश्वस्य सर्वासु भाषासु मुख्या, मधुरा, दिव्या, प्रचुरसाहित्यसम्पन्ना अङ्गीक्रियते। सर्वविदितमेव यतु संस्कृतं हि नाम देवी वाक्। उक्तञ्च।

''संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः।''[1]

पुरा इयं भाषा न केवलं भारतस्य अपितु सम्पूर्ण लोकस्य लोकप्रिया भाषा आसीत्। कालान्तरे इयं भाषा भारतस्य महत्त्वपूर्णा भाषा भूतवती परं विदेशेऽपि अस्याः प्रभूतप्रचाराः सन्ति। अधुना विश्वे सर्वत्र संस्कृतस्य महत्त्वं स्वीक्रियते। पाश्चात्य देशीयाः विद्वांसः अस्याः उपयोगितां विलोक्य अस्याः अध्ययनस्य प्रयासं कुर्वन्ति। मैक्समूलर, विण्टरनिट्ज, कीथ, बेवर इत्यादयः विद्वांसः अस्याः महिमानुमुपवर्णयन्तो अमरत्वं उपगताः। अमेरिकाफ्रीकास्ट्रेलियारूसजर्मनीजापान– ब्रिटेनेत्यादीनां राष्ट्राणां विश्वविद्यालयेषु संस्कृतभाषा वैकल्पिकरूपेण पाठ्यक्रमेषु निर्धारिता अस्ति।

**सांस्कृतिकक्षेत्रे संस्कृतस्य उपयोगिताः** अस्माकं भारतीया संस्कृतिः संस्कृतभाषायाम् एवं सुरक्षिता अस्ति। भारतीया संस्कृतिः हि विश्वस्य प्राचीनतमा संस्कृतिः। जीवनस्य परमोद्देश्यमिह धर्मार्थकाममोक्षरूपी पुरूशार्थसिद्धिः भणिता। भारतीयसंस्कृतेः स्वरूपम् वेदेषु निरूपितम् अस्ति। चतुर्णां वेदानां अध्ययनान्तरं वयं सकलां भारतीय–संस्कृतिं ज्ञातुं समर्थाः भवामः। सेयं वैदिकी संस्कृतिः प्रथमा संस्कृतिरिति वेदे समादिश्यते–

''सा प्रथमा संस्कृतिर्विश्ववारा।''[2]

यज्ञानुष्ठानम्, सदाचरणम्, शिवचिन्तनम्, अहिंसापालनम्, दानप्रदानम्, गुरूसेवनम्, तपोविधानम्, परोपकरणं चेह भूयोमूय उपदिश्यते। भारतीयानां जीवनं षोडश संस्कारान् विहाय पूर्णमेव न भवति ते च षोडश संस्काराः गर्भाधानाद् आरम्भय अन्त्येष्टिपर्यन्ताः सन्ति, ते च संस्कृत भाषायामेव ग्रन्थेषु उपनिबद्धाः सन्ति। वेदानां यज्ञपद्धतिः, परमात्मनः सर्वव्यापकत्वं, प्राकृतिकशक्तिषु देवत्वम्, अध्यात्मनि अभिरूचिः, ज्ञानस्य प्रतिष्ठा, कर्मणः प्रधानता, मोक्षे विश्वासः, पुनर्जन्मनि विश्वासः चाधुनापि सांस्कृतिकी निधिरूपेण अस्माभिः स्वीक्रियते। सर्वमपि अस्माकं जीवनदर्शनं विविधकार्य चात्र समाहितम्। भारतीया संस्कृतिः धर्मप्राणसंस्कृतिरिति। लौकिकं पारलौकिकं हितसाधकं तत्वमेव धर्मः। उक्तं हि कणादेन

''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।''[3]

धर्मेणैव जीवनं रक्ष्यते–

''धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।''[4]

जीवनस्य आधारभूतो धर्म एव जनेषु पशुभ्यो विशिष्यते–

''आहारनिद्राभ्यमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेशामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।''[5]

कमैव मानवजीवनस्य सर्वस्वम्। अनासक्तधिया समाहितं निष्काम कर्म एवं लोके प्रशस्यते। उक्तञ्च–

''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि।।[6]

अतः वयं वस्तुं शक्नुमः यत् भारतीयानां जीवनं संस्कृतभाषायां इत्थमभिव्याप्तं यत् प्रयत्नेनापि न दूरीकर्तुं शक्यते। वर्तमान सन्दर्भे अपि भारतीयसंस्कृतिं ज्ञातुं संस्कृतस्य उपयोगिता सर्वोपरि।

**ऐतिहासिकक्षेत्रे संस्कृतस्य उपयोगिताः** भारतस्य प्राचीनतमं विपुलं वाङ्मयम् आर्यभाषायां देववाण्यामेव सुरक्षितम् अस्ति। अस्माकं प्राचीनं साहित्यं, निखिलमपि ज्ञानविज्ञानं अस्यां एव भाषायां विद्यते। अद्यत्वे ज्ञानविज्ञानकलादिविषयेषु यावन्ति महान्ति कार्याणि सम्पाद्यन्ते, तथ्यानि प्रकाश्यन्ते, संस्काराः समर्ज्यनो या च विश्वसंस्कृतिः विकस्यते एतस्य सर्वस्याऽपि मूलाधारस्तु संस्कृतमेव अस्ति। यतोहि प्राचीनाः शिलालेखा संस्कृते एव लिखिताः सन्ति। विश्वसंस्कृतेः प्राचीनतमं वैदिकसाहित्यमपि अस्यामेव भाषायां उपनिबद्धम् अस्ति।

**भाषाविज्ञानक्षेत्रे संस्कृतस्य उपयोगिताः** संस्कृतस्य उपयोगिता आधुनिक भाषाविज्ञाने अपि वर्तते। संस्कृत भाषा भारोपीय भाषा परिवारे प्रत्नतमा भाषा वर्तते। इयं भाषा हि स्वशब्ददानेन अन्याः भाषा पोशयति। इयं खलु भारतीयाधुनिक प्रान्तीयभाषाणां सम्पोषिका विद्यते। सर्वास्वपि भारतीयासु बंगला, उडिया, मराठी, गुजराती, पंजाबी हिन्दी प्रभृतिषु प्रान्तीयभाशासु तेलुगु, तमिल, मलयालम–कन्नडादिषु चार्यतर भारतीयभाशासु प्रतिशतकं षष्टिशब्दाः संस्क1त भाषाया एवं सन्ति। निश्चितम् एतद् राष्ट्रीयहिन्दी भाषां संस्कृतमेव समृद्धां सम्पन्नाञ्च कर्तुं प्रभवति, यतोहि जननी स्वपुत्रीं लालयति पालयति च। जर्मन, फ्रेञ्च, आङ्गलादिभाषासु अपि सहस्रशः संस्कृत शब्दाः प्रयुज्यन्ते। डॉ0 राधाकृष्णन महोदयेन उक्तम्–

Sanskrit is the parent language from which many Indian languages are derived. It has also its influence on the Dravidian languages….."[7]

भाषा दृष्ट्या अपि ऐषा व्याकरण दोषादिरहिता, क्रिया–कारक–विभाग समन्विता तथा भाषायाः भूषणभूताः शोभाधायकाः अलंकाराः यथा अस्यां भाषायां सम्मुलसन्ति नान्यस्यां कस्यामपि भाषायाम्। उच्चारण दृष्टियाऽपि आंग्लभाषायां लिख्यते अन्यद् पठ्यते च अन्यद् यथा–लिख्यते But (बुट) पठ्यते 'बट' लिख्यते Walk (वाल्क) पठ्यते। वाक। परं संस्कृते तु यत् पठ्यते तत् लिख्यते। शब्दकोष दृष्ट्या अपि एषा भाषा अतीवोच्चतमं पदम् अधितिष्ठति। संस्कृतस्य शब्दरचनाशक्ति अपूर्वा वर्तते।

**धार्मिकक्षेत्रे संस्कृतस्य उपयोगिताः** धार्मिकक्षेत्रे अपि संस्कृतस्य महती उपयोगिता वर्तते। वेदानामपोरूषेयात् धार्मिक साहित्य सम्पन्नत्वाच्य इयं भाषा धार्मिक महत्वं वहति। वेदा अस्माकं प्राचीनतमा धर्मग्रन्थाः। वेदानां ज्ञानेनैव पुरा ऋषिभिः आचार्यैः च अस्मिन्। विश्वे अक्षयं यशोऽधिगतम्। महर्षिणा मनुना उक्तम्

''वेदोऽखिलो धर्ममूलम्।''[8]

वैदिकधर्म ईश्वर अजरः, अमरः शुद्धः, व्यापकः, सर्वशक्तिमान्, जगन्नियन्ता, न्यायशील, सर्वज्ञा शुभाशुभकर्मपफलदाता, सृष्टि–स्थिति प्रलयकर्ता च। भक्तः निवेदनं करोति–

''प्राणाय नमो यस्य सर्वमिदं वशे।
यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं यस्मिन्सर्वं प्रतिष्ठितम्।।''[9]

योगदर्शनकृता पतञ्जलिना यम नियम पालनमेव धर्मः व्यादिश्यते। संस्कृत भाषा एव वैदिक शाक्त वैष्णव–सौर–ब्राह्मणादि धर्माणाम् उद्भाविनी अस्ति। वैदिकधर्मसंश्रित्य तस्य प्रतिक्रियारूपाणि वार्वाक्–जैन बौद्ध मुख्यानि नास्तिकमतानि समाजायन्त। मीमांसा–साख्य–योग–न्याय वैशेषिक षड्दर्शन ग्रन्थानां भाषापि संस्कृतमेव आजते। महाभाष्यकृता पतञ्जलिना धर्मत्वेन व्यादिश्यते–

''ब्राह्मणेन निष्कारणो धर्मः षड्ङगो वेदोऽध्येयो ज्ञेयश्च।''[10]

वेदो हि सर्वग्रन्थेभ्यः प्राचीनतमत्वेन सर्वषां धर्माणामादिस्रोतो मानवधर्मप्रवर्तकश्च। उक्तञ्य– धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः। अधुनाऽपि वेदानां धार्मिकमहत्वं सवौधिकमस्ति।

**सहित्यिकक्षेत्रे संस्कृतस्य उपयोगिताः** संस्कृत भाषायाः साहित्यं गुरूतमम्। न कस्याः अपि भाषायाः साहित्यमद्यापि तज्जेतुं शक्नोति। अत्रत्यं साहित्यं वैदिक–लौकिक भेदेन द्विविधम्। वैदिके साहित्ये साहिता ब्राह्मणारण्यकोपनिशदारयो अन्तर्भवन्ति। लौकिके च दर्शनपुराणरामायण– महाभारतकाव्यादीनि भवन्ति। इमे सर्वे ग्रन्थाः अस्मभ्यं नानाप्रकारकं ज्ञानं ददति। विज्ञान–आयुर्वेद–ज्योतिर्विद्या, गणित–राजनीतिशास्त्र– अर्थशास्त्र–नीतिशास्त्र– दर्शनशास्त्र– इत्यादयः अनेके विषयाः संस्कृत भाषायां एव सन्ति। असंख्यकाव्यनाट्यादीनाम् उपजीव्यम् आदिकाव्यम् रामायणं भारतीयसंस्कृतेः सच्चरित्रस्य आदर्शरूपेण अवतिश्ठते। सत्यमुक्तम्–

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावत् रामायण कथा लोके प्रचरिष्यति।।[11]

धर्मार्थकामोख विषयाणां तत्वभूतं पञ्चमवेदत्वेन विख्यातं महाभारतं स्व ज्ञान गौरवेण समतिरिच्यते। महर्षिणा व्यासेन प्रोच्यते–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षम।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।[12]

रघुवंश कुमार सम्भव बुद्धचरित किरातार्जुनीय शिशुपाल वधनैषधीय चरित प्रभृतीनि महाकाव्यानि संस्कृते एव सन्ति।

**नाट्यसाहित्ये**
अभिज्ञानशाकुन्तलमालविकाग्निमित्रउत्तररामचरितमहावीरचरितादिषु सर्वविषयावगहिज्ञानं समुल्लसति। गद्यसाहित्ये दशकुमारचरित – वासवदत्ता – कादम्बरी – हर्षचरितादयः प्रसिद्धाः ग्रन्थाः सन्ति।

**राष्ट्रियक्षेत्रे संस्कृतस्य उपयोगिताः** राष्ट्रियक्षेत्रे अपि संस्कृतस्य महती उपयागिता अस्ति। भारतीयानां राष्ट्रियजीवनमत्र विस्तृतरूपेण वर्णितम् अस्ति। अस्माकं संस्कृति, सभ्यता, सदाचारः आत्मा च संस्कृते एव निवसन्ति। संस्कृते राष्ट्रियैकतायाः अपूर्वसन्देशो विद्यते। यस्मिन् देशे, राष्ट्रे, समाजे संघे वा एकता अस्ति स एव देशः

उन्नतिपथमधिरोहति। वेदे, पुराणे, स्मृतौ, शास्त्रे, सर्वत्र एकतायाः प्रशंसा उपलभ्यते। अतएव उक्तं वेदे –

''संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सजानानां उपासते।[13]

अथर्ववेदस्य पृथ्वीसूक्तस्य सर्वोत्तमा उक्ति अस्ति

''माता भूमिः पुत्रोऽहं पृथिव्याः।''[14]

पञ्चतन्त्रे हितोपदेशे च एकतायाः अनेके लाभाः सम्यक् रूपेण प्रतिपादिताः।
वस्तुतः संस्कृतभाषैव सर्वान् एकसूत्रे निवध्नाति, राष्ट्रिय अखण्डतां शिक्षयति, पारस्परिकप्रेमभावना पुष्णति, विश्वबन्धुत्वं जागरयति लोकहितं च साधयति।

**संस्कृत कविः** सकलां वसुधां स्वकुटुम्बं स्वीकारोति। तस्य कृते न कोऽपि परः न चापि अपरः। सः सदैव विश्वहिताय कामयते। श्रीमन्नारायणपण्डितेन कथितम् –

''अयं निजः परोवेति गणना लधुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।[15]

अद्यत्वे भारतवर्षे सर्वत्र आतंकवादस्य प्रभावः दरीदृश्यते। आतंकवादेन शान्तेरधिगमः न कदापि सम्भवः। परं संस्कृतविद्यया आतंकवादस्य निदानं भवितुं शक्नोति।

ईशावास्यमिदं सर्व यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।[16]

''सर्वे भवन्तु सुखिनः'', वसुधैव कुटुम्बकम् इति वैदिकसिद्धान्तानुसरणादेव शान्तिः संभवति। मानवानां कल्याणः आतंकवादस्य व विनाशः भविष्यति।
इत्थ वयं वक्तु शक्नुमः यत् आधुनिककाले अपि संस्कृतस्य महति उपयोगिता परिलक्ष्यते। अधुना सर्वत्र हिंसा, भ्रष्टाचारः, अनुशासनहीनता, राष्ट्रियैकतायाः अभावः, आर्थिक विषमता इत्यादयः दृश्यन्ते। एतेषां मुख्य कारणं संस्कृतस्य उपेक्षणमेव वर्तते। आचारशिक्षासंग्रहणाय, नीतितत्त्वावबोधाय, अध्यात्मशास्त्रानुशीलनाय, संगीतनृत्याभिनयादिकलानां सूक्ष्मज्ञानाय संस्कृतविद्या एव आधारशिला विद्यते। सम्प्रति खण्डितराष्ट्रियैकता, भाषावाद–प्रान्तवाद जातिवाद– भ्रष्टाचार इत्यादीनां समस्यानां समाधानं संस्कृतेन एवं भवितुम् शक्नोति।

**सन्दर्भः**


1. काव्यादर्शः
2. यजुर्वेदः 7.14
3. वैशेषिकदर्शन 1.1.2
4. मनुस्मृति 8.15
5. हितोपदेशः–1.25
6. गीता–2–47
7. राष्ट्रपति भाषण डॉ. राधाकृष्णन्–मद्रास संस्कृत महाविद्यालय 1957
8. मनुस्मृति–2.6
9. अथर्ववेदः–11.4.1
10. महाभाष्य – आ0–1
11. रामायण – 1.2.17
12. महाभारत – 1.2.21
13. ऋग्वेदः – 10.191.2
14. अथर्ववेदः – 12.1.2
15. हितोपदेशः – 1.69
16. ईशावास्योपनिषद – 1